**दिनाङ्क :- 01.09.2024**
**प्रातः - 06:55**

## अथ वार्ताः

### इकोनोमिक टाइम्स -विश्वनेतृमञ्चः

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् देशस्य स्थिरवृद्ध्यै सर्वकारस्य मन्त्रः पुन: प्रारूपस्य प्रदर्शनस्य इति अस्ति। ह्यः नवदिल्ल्यां इकोनोमिक टाइम्स-विश्वनेतृमञ्चे सम्बोधयन् सः उक्तवान् यत् विगतेषु दशवर्षेषु भारतीय-अर्थव्यवस्थायां नवति-प्रतिशतं-वृद्धिः अभवत्, तस्मिन् एव काले विश्व-अर्थव्यवस्थायां पञ्चत्रिंशत्-प्रतिशतं-वृद्धिः अभवत् | प्रधानमन्त्रिणा प्रतिपादितं यत् जनाः देशस्य उपलब्धीनां साक्षिणः सन्ति, आत्मविश्वासेन च परिपूर्णाः सन्ति। सः उल्लेखितवान् यत् भारतेन प्रायः पूर्वानुमानैः, सहयोगिभ्यः च उत्तमं प्रदर्शनं कृतम् अस्ति। श्रीमोदिना उक्तं तस्य सर्वकारः सुशासनाय प्रतिबद्धः अस्ति। सः अवदत् यत्, विगतेषु दशवर्षेषु पञ्चविंशतिकोटिजनाः निर्धनवर्गात् बहिः समागताः। प्रधानमन्त्रिणा उक्तं यत् तृतीयकार्यकाले तस्य सर्वकारस्य अभिप्रायः अधिकं सुदृढम् अस्ति।

### प्रधानमन्त्री न्यायपालिका

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् महिलासु अत्याचार: बालकानां सुरक्षा च समाजाय गभीरचिन्ताया: विषयो वर्तते। असौ ह्यः नवदिल्ल्या: 'भारतमण्डपम्' इत्यत्र जनपद-न्यायपालिकाया: द्विदिवसीय-राष्ट्रियसम्मेलनस्य उद्घाटनानन्तरम् एतद् उक्तवान्। श्रीमोदी एतदपि उक्तवान् यत् यथाशीघ्रं महिला: विरुद्ध्य अत्याचारसम्बद्धेषु प्रकरणेषु निर्णया: विधास्यन्ते, तदैव महिलानां सुरक्षापि सुनिश्चिता भविष्यति।

श्रीमोदिना प्रोदीरितं यत् सर्वोच्चन्यायालयस्य पञ्चसप्तति-वर्षाणि लोकतन्त्रस्य जननीरूपेण भारतस्य गौरवं संवर्धयन्ति। तेनोक्तं यत् सर्वोच्च-न्यायालयस्य पञ्चसप्तति-वर्षाणि भारतस्य संविधानस्य तस्य सांवैधानिक-मूल्यानां च यात्रा वर्तते। असौ कथितवान् यत् भारतस्य जना: कदापि सर्वोच्चन्यायालयं भारतीयन्यायिक-प्रणालीं च प्रति प्रश्नं न उत्थापितवन्त:। अनेन प्रोक्तं यत् भारतीयलोकतन्त्रे न्यायपालिका-संविधानस्य रक्षकत्वेन मन्यते। प्रधानमन्त्रिणा कथितं यत् एतेषां विधीनां भावना 'नागरिक: प्रथम:, सम्मानं प्रथमं, न्याय: प्रथम:' इति वर्तते। अस्मिन् अवसरे प्रधानमन्त्री सर्वोच्चन्यायालयस्य स्थापनाया: पञ्चसप्तति-वर्षपूर्त्यवसरे प्रैषचिटिकाया: नाणकस्य च लोकार्पणं कृतवान्। स्वीये सम्बोधने भारतस्य मुख्य-न्यायाधीश: न्यायमूर्ति: डी.वाई.-चन्द्रचूड: उक्तवान् यत् सम्मेलनमिदं अस्मिन् वर्षे मार्चमासे कच्छनगरे आयोजितस्य अखिलभारतीय-जनपद-न्यायधीश-सम्मेलनस्य परिणामो वर्तते।

### हरियाणाविधानसभा

निर्वाचनायोगेन ह्यः हरियाणाविधानसभानिर्वाचनस्य मतदानस्य दिनाङ्काय संशोधनं कृतम्। अधुना मतदानं अक्टोबर्-मासस्य प्रथमदिनाङ्कस्य स्थाने अक्टोबर्-मासस्य पञ्चमे दिनाङ्के भविष्यति। आयोगेन विज्ञप्तौ उक्तं यत्, अतिपुरातने असोज अमावस्या पर्व समारोहे भागं ग्रहीतुं हरियाणायाः बिश्नोई-समुदायः राजस्थानम् सम्प्राप्स्यति अस्मिन् विषये राष्ट्रिय-राजनैतिकदलानां, एकस्य राज्यस्य राजनैतिक-दलस्य, अखिलभारतीय-बिश्नोई-महासभायाः च प्रतिनिधित्वं प्राप्तम्। आयोगेन उक्तं यत् ते बहूनां जनानां मतदानाधिकारात् विमुखं न कर्तुं शक्नुवन्ति तथा च राज्यस्य विधानसभायाः सामान्यनिर्वाचने मतदातृनां सहभागितायाः न्यूनीकरणं कर्तुं अपि न प्रभवन्ति। आयोगेन एतेषु ज्ञापनेषु विचारं कृत्वा एव मतदानस्य तिथि अक्टोबर् मासस्य पञ्चमे दिनाङ्के कृतः अस्ति। निर्वाचनआयोगेन एतदपि घोषितं यत् हरियाणा-जम्मू-कश्मीरयोः मतगणना अक्टोबर्-मासस्य चतुर्थ दिनाङ्कस्य स्थाने अक्टोबर्-मासस्य अष्टमे दिनाङ्के भविष्यति।

**॥ इति वार्ताः॥**